## दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम् । (८१/१२०१)

दैवयज्ञि शौचिवृक्षि सात्यमुग्रि काण्ठेविद्धि [1]इत्येतेषामन्यतरस्यां ष्यङ प्रत्ययो भवति। इञन्ता एते, गोत्रग्रहणं [2]च नानुवर्तते । तेनोभयत्रविभाषेयम् । गोत्रे पूर्वेण[3] ष्यङादेशः प्राप्तो विकल्प्यते, अगोत्रे [4]त्वनन्तरेऽपत्ये पक्षे विधीयते । तेन मुक्ते 'इतो मनुष्यजातेः' (४. १. ६५/५२०) इति ङीषेव भवति । दैवयज्ञ्या, दैवयज्ञी । शौचिवृक्ष्या, शौचिवृक्षी । सात्यमुग्र्या, सात्यमुग्री । काण्ठेविद्ध्या, काण्ठेविद्धी[5] ॥

## समर्थानां प्रथमाद्वा । (८२/१०७२)

त्रयमप्यधिक्रियते समर्थानाम् इति [6]च, प्रथमाद् इति च, वा इति च । स्वार्थिकप्रत्ययावधिश्चायमधिकारः, 'प्राग्दिशो विभक्तिः' (५. ३. १/१९४७) इति यावत् । स्वार्थिकेषु ह्यस्योपयोगो नास्ति, विकल्पोऽपि तत्रानवस्थितः । केचिन्नित्यमेव भवन्ति । लक्षणवाक्यानि 'तस्यापत्यम्' (४. १. ९२/१०८८), 'तेन रक्तं [7]रागात्' (४.२.१/१२०२)' 'तत्र भवः' (४.३.५३/१४२८) इत्येवमादीनि भविष्यन्ति । तेषु सामर्थ्ये सति प्रथमनिर्दिष्टादेव विकल्पेन प्रत्ययो भवति इति वेदितव्यम् । समर्थानाम् इति निर्धारणे षष्ठी । समर्थानां मध्ये प्रथमः प्रत्ययप्रकृतित्वेन निर्धार्यते । तस्य इति सामान्यं[8] विशेषलक्षणार्थम् । तदीयं प्राथम्यं विशेषाणां विज्ञायते । उपगोः अपत्यम् औपगवः[9] । समर्थानाम् इति किम् ? कम्बल उपगोः, अपत्यं देवदत्तस्य । प्रथमात् इति किम् ? षष्ठ्यन्ताद् यथा स्यात्, प्रथमान्तान्मा भूत् । [10]वा इति किम् ? वाक्यमपि यथा स्यात् उपगोरपत्यम् इति । यद्येवं समासवृत्तिः तद्धितवृत्त्या [11]बाध्येत उपगवपत्यम् इति । नैष दोषः । पूर्वसूत्रादन्यतरस्यांग्रहणमनुवर्तते । तेनैतदपि भविष्यति ॥

## प्राग्दीव्यतोऽण् । (८३/१०७३)

तेन दीव्यति (४. ४.२/१५५०) इति वक्ष्यति । तदेकदेशो दीव्यच्छब्दो अवधित्वेन गृह्यते । प्राग्दीव्यत्संशब्दनाद् [12]यानित ऊर्ध्वमनुक्रमिष्यामः, अण् प्रत्ययस्तत्र भवति इति वेदितव्यम् । अधिकारः, परिभाषा, विधिर्वा [13]इति त्रिष्वपि दर्शनेष्व[14]पवादविषयं परिहृत्य अण् प्रवर्तते । वक्ष्यति, 'तस्यापत्यम्' (४. १. ९२/१०८८) – औपगवः । कापटवः ॥

## अश्वपत्यादिभ्यश्च । (८४/१०७४)

अश्वपत्यादिभ्यः प्रातिपदिकेभ्यः प्राग्दीव्यतीयेष्वर्थेषु अण् प्रत्ययो भवति । पत्युत्तरपदाद् ण्यं वक्ष्यति, [15]तस्यापवादः । आश्वपतम् । [16]शातपतम् ।

अश्वपति । [17]शतपति । धनपति । गणपति । राष्ट्रपति । कुलपति । गृहपति । [18]धान्यपति । [19]पशुपति । धर्मपति । [20]सभापति । प्राणपति । क्षेत्रपति ॥

---

1. इत्येतेभ्यः ग. फ. 2. च नास्ति ब.ह, चानुवर्तते क. इ. 3. नित्यं इत्यधिकम् ह. 4. त्वनन्तरापत्ये क. ह, अपत्ये नास्ति ब. फ. 5. पूर्णः स्त्र्यधिकारः इत्यधिकम् अ. 6. च नास्ति ई. 7. रागात् नास्ति ब.ड. 8. विशेषाणां ब. ई. ड. ह, विशेषाणां विशेषणं क. 9. कापटवः इत्यधिकम् ह. 10. वाग्रहणम् ब. फ. ह. 11. बाध्यते अ. ब. 12. यदित ब. क.ड.इ. 13. इत्ययं त्रिष्वपि विषयेषु क, इत्ययं क.इ. 14. अपवादविषयः अण् ह. 15. तस्यायमपवादः फ. 16. धानपतम् फ., आश्वपतः शातपतः ह, नास्ति ड. 17. स्थानपति यज्ञपति ड. 18. नास्ति फ. 19. बन्धुपति फ. ई. 20. नास्ति फ, शणपति ई.